# श्रीरामरहस्योक्त श्रीरामाष्टोत्तरशतनामस्तोत्रम्

Shri Ramarahasyokta Shri
Ramashtottara Shata Nama Stotram

sanskritdocuments.org

April 20, 2019

# Shri Ramarahasyokta Shri Ramashtottara Shata Nama Stotram

# श्रीरामरहस्योक्त श्रीरामाष्टोत्तरशतनामस्तोत्रम्

## Sanskrit Document Information

Text title : rAmAShTottarashatanAmastotram 8

File name : rAmAShTottarashatanAmastotram8.itx

Category : raama, aShTottarashatanAma, nAmAvalI

Location : doc_raama

Transliterated by : NA

Proofread by : NA

Latest update : April 20, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

April 20, 2019

*sanskritdocuments.org*

# श्रीरामरहस्योक्त श्रीरामाष्टोत्तरशतनामस्तोत्रम्

रामो रावणसंहारकृतमानुषविग्रहः ।
कौसल्यासुकृतव्रातफलं दशरथात्मजः ॥ १॥

लक्ष्मणार्चितपादाब्जसर्वलोकप्रियङ्करः
साकेतवासिनेत्राब्जसंप्रीणनदिवाकरः ॥ २॥

विश्वामित्रप्रियश्शान्तः ताटकाध्वान्तभास्करः ।
सुबाहुराक्षसरिपुः कौशिकाध्वरपालकः ॥ ३॥

अहल्यापापसंहर्ता जनकेन्द्रप्रियातिथिः ।
पुरारिचापदलनो वीरलक्ष्मीसमाश्रयः ॥ ४॥

सीतावरणमाल्याढ्यो जामदग्न्यमदापहः ।
वैदेहीकृतश्रृङ्गारः पितृप्रीतिविवर्धनः ॥ ५॥

ताताज्ञोत्सृष्टहस्तस्थराज्यस्सत्यप्रतिश्रवः ।
तमसातीरसंवासी गुहानुग्रहतत्परः ॥ ६॥

सुमन्त्रसेवितपदो भरद्वाजप्रियातिथिः ।
चित्रकूटप्रियावासः पादुकान्यस्तभूभरः ॥ ७॥ चित्रकूटप्रियस्थानः

अनसूयाङ्गरागाङ्कसीतासाहित्यशोभितः ।
दण्डकारण्यसञ्चारी विराधस्वर्गदायकः ॥ ८॥

रक्षःकालान्तकस्सर्वमुनिसङ्घमुदावहः ।
प्रतिज्ञातास्रशरवधः शरभङ्गगतिप्रदः ॥ ९॥

अगस्त्यार्पितबाणासखड्गतूणीरमण्डितः ।
प्राप्तपञ्चवटीवासो गृध्रराजसहायवान् ॥ १०॥

कामिशूर्पणखाकर्णनासाच्छेदनियामकः ।
खरादिराक्षसव्रातखण्डनावितसज्जनः ॥ ११॥

सीतासंश्लिष्टकायाभाजितविद्युद्युताम्बुदः ।
मारीचहन्ता मायाढ्यो जटायुर्मोक्षदायकः ॥ १२॥

कबन्धबाहुदलनश्शबरीप्रार्थितातिथिः ।
हनुमद्वन्दितपदस्सुग्रीवसुहृदव्ययः ॥ १३॥

दैत्यकङ्कालविक्षेपी सप्ततालप्रभेदकः ।
एकेषुहतवाली च तारासंस्तुतसद्गुणः ॥ १४॥

कपीन्द्रीकृतसुग्रीवस्सर्ववानरपूजितः ।
वायुसूनुसमानीतसीतासन्देशनन्दितः ॥ १५॥

जैत्रयात्रोत्सवः जिष्णुर्विष्णुरूपो निराकृतिः । जैत्रयात्रोद्यतो
कम्पिताम्भोनिधिस्सम्पत्प्रदस्सेतुनिबन्धनः ॥ १६॥

लङ्काविभेदनपटुर्निशाचरविनाशकः ।
कुम्भकर्णाख्यकुम्भीन्द्रमृगराजपराक्रमः ॥ १७॥

मेघनादवधोद्युक्तलक्ष्मणास्त्रबलप्रदः ।
दशग्रीवान्धतामिस्रप्रमापणप्रभाकरः ॥ १८॥

इन्द्रादिदेवतास्तुत्यश्चन्द्राभमुखमण्डलः ।
बिभीषणार्पितनिशाचरराज्यो वृषप्रियः ॥ १९॥

वैश्वानरस्तुतगुणावनिपुत्रीसमागतः ।
पुष्पकस्थानसुभगः पुण्यवत्प्राप्यदर्शनः ॥ २०॥

राज्याभिषिक्तो राजेन्द्रो राजीवसदृशेक्षणः ।
लोकतापपरिहन्ता च धर्मसंस्थापनोद्यतः ॥ २१॥ लोकतापापहर्ता
शरण्यः कीर्तिमान्नित्यो वदान्यः करुणार्णवः ।
संसारसिन्धुसम्मग्नतारकाख्यामहोज्वलः ॥ २२॥ तारकाख्यमनोहरः

मधुरोमधुरोक्तिश्च मधुरानायकाग्रजः ।
शम्बूकदत्तस्वर्लोकश्शम्बरारातिसुन्दरः ॥ २३॥

अश्वमेधमहायाजी वाल्मीकिप्रीतिमान्वशी ।
स्वयंरामायणश्रोता पुत्रप्राप्तिप्रमोदितः ॥ २४॥

ब्रह्मादिस्तुतमाहात्म्यो ब्रह्मर्षिगणपूजितः ।
वर्णाश्रमरतो वर्णाश्रमधर्मनियामकः ॥ २५॥

रक्षापरो राजवंशप्रतिष्ठापनतत्परः । रक्षावहः
गन्धर्वहिंसासंहारी धृतिमान्दीनवत्सलः ॥ २६॥

ज्ञानोपदेष्टा वेदान्तवेद्यो भक्तप्रियङ्करः ।
वैकुण्ठवासी पायान्नश्चराचरविमुक्तिदः ॥ २७॥ वैकुण्ठलोकसंवासी

इति श्रीरामरहस्योक्तं श्रीरामाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ।

---

*Shri Ramarahasyokta Shri Ramashtottara Shata Nama Stotram*
pdf was typeset on April 20, 2019

Please send corrections to *sanskrit@cheerful.com*